# मृत्युञ्जय कवचं

श्री गणेशाय नमः
भैरव उवाचः–

श्रुणुष्य परमेशानि कवचं मन्मुखोदितं
महामृत्युञ्जयस्यास न देयं परमाद्भुतं 1

यं धृत्वा यं पठित्वा च यं श्रुत्वा कवचोत्तमं
त्रैलोक्याधिपतिर्भूत्वा सुखितो /स्मि महेश्वरि 2

तदेव वर्ण्णयिष्यामि तव प्रीत्या वरानने
तथापि परमं तत्त्वं न दातव्य दुरात्मने 3

ओं अस्य श्री महा मृत्युञ्जय कवचस्य
श्रीभैरव ऋषिः गायत्री छन्दः

श्री मृत्युञ्जय रुद्रो देवता ओं बीजं
ज्रुं शक्तिः सः कीलकं हौं इति तत्त्वं
चतुर्वर्ग्गफलसाधने पाठे विनियोगः

ओं चन्द्रमण्डलमद्ध्यस्थे रुद्रमाले विचित्रिते
तत्रस्तं चिन्तयेत् साद्ध्यं मृत्युं प्राप्नोति जीवति 4

ओं ज्रूं सः हौं शिरः पातु देवोमृत्युञ्जयो मम

श्रीशिवो वै ललाटं च ओं हौंभ्रुवौ सदाशिवः 5

नीलकण्ठो/वताद् गण्डौ नासां मे त्रिपुरान्तकः
मुखं पीयूषघटभृद् ओष्ठौ मे कृत्तिकांबरः 6

हनुं मे हाटकेशानोमुखं बटुकभैरवः
कन्धरां कालमथनो गळं गणप्रियो/वतु 7

स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशो /वतु
नासान मे गिरिजानाथः पायादंगुलिसंयुतान 8

स्तनौ तारापतिः पातु वक्षः पशुपतिर् मम
कक्षिं कुबेरवदनः पार्शौ मे मारशालनः 9

सर्व्वः पातु तया नाभिं शूली पृष्ठं ममावतु
शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः 10

कटिं कालान्तकः पायाद् ऊरु मे /न्धकघातकः
जागरूको /वताज्जानू जंघे मे कालभैरवः 11

गुल्फो पायाज्जटाधारी पादौ मृत्युञ्जयो / वतु
पादादिमुर्द्धपर्यन्तं सद्योजातो ममावतु 12

रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः
पूर्व्वं बलविकरणो दक्षिणे कालशासनः 13

पश्चिमे पार्वतीनाथः उत्तरे मां मनोन्मनः
ऐशान्यामीश्वरः पायादाग्नेयामग्निलोचनः 14

नैरृत्यां शंभुरव्यान्मां वायव्या वायुवाहनः
ऊर्ध्वं बलप्रमधनः पाताळे परमेश्वरः 15

दशदिक्षु सदा पातु महामृत्युञ्जयश्च मां
रणे राजकुले द्युते विषमे प्राणसंशये 16

पायाद् ओं ज्रुं महारुद्रो देवदेवो दशाक्षरः
प्रभाते पातु मां ब्रह्मा मद्ध्याह्ने भैरवो / वतु 17

सायं सर्व्वेश्वरः पातु निशायां नित्यचेतनः
अर्द्धरात्रे महादेवो निशान्ते मां महोदयः 18

सर्व्वदा सर्व्वतः पातु ओं ज्रुं सः हौं मृत्युञ्जयः

(इतीदं कवचं पूर्ण्णं त्रिष्ठ लोकेष्ठ दुर्ल्लभं)

Ver 0.1